नृसिंहकवचप्रारंभः

श्रीगणेशायनमः॥श्रीनृसिंहायनमः॥ॐ अस्यश्रीनृसिंहकवचस्तो
त्रमालामंत्रस्यव्यासप्रह्लादाऋषी॥श्रीलक्ष्मीनृसिंहोदेवता॥अनुष्टु
प्छंदः॥गुह्यरूपधृगितिबीजं॥श्रीशक्तिः॥सर्वव्यापिस्वभवासइ
तिकीलकं॥ममअभीष्टसिद्धिद्वाराश्रीलक्ष्मीनृसिंहप्रीत्यर्थेजपे
विनियोगः॥ॐयोगिहृत्पद्मवासायअंगुष्ठाभ्यांनमः॥नृसिं
हतर्जनीभ्यांनमः॥स्वयंप्रकाशायमध्यमाभ्यांसकलत्रयीस्तुरुषायअना
मिकाभ्यांसोमसूर्याग्निलोचनायकनिष्ठिकाभ्यां॥दिव्यास्त्रायफट

भुजाग्रकरतलकरपृष्ठाभ्यां॥एवंहृदयादिन्यासः॥अथध्यानं॥कर्पूरधा
मधवलंकटकांगदादिनिष्कंत्रिनेत्रराशिशेखरमंडितास्यं॥वामांगसंस्थ
तरमाश्रयनाभिरामंसाक्षात्स्वसंगदनृहरिंनमामि॥नमस्कृत्यगणा
धीशंसर्वविघ्ननिवारणं॥नृसिंहकवचंवक्ष्येप्रह्लादेनोदितंपुरा॥१॥सर्वरक्षाकरंनृ
णांसर्वोपद्रवनाशनं॥सर्वसंपत्करंचैवस्वर्गमोक्षप्रदायकं॥२॥ध्यात्वानृसिंह
देवेशंहेमसिंहासनस्थितं॥विह्वाभ्यधिनयनंशरदिंदुसमप्रभं॥३॥लक्ष्म्यालिंगित
वामांगंविभूतिभिरुपाश्रितं॥चतुर्भुजंकोमलांगंमणिकुंडलभूषितं॥४॥हारोपशो
भितोरस्कंरत्नकेयूरशोभितं॥तप्तकांचनसंकाशंपीतनिर्मलवाससं॥५॥इंद्रादिसुर

Digitized with financial assistance from the Government of Maharashtra on 11 June, 2017

मौलिस्थेवरमाणिक्यदीप्तिभिः॥विराजितपदद्वंद्वोरववक्त्रादिदेवतैः॥१॥गरुत्मतो
त्रविनयंस्तूयमानःसुदान्वितः॥स्वदक्षमध्यस्थरुक्मायकवचंपठेत्॥२॥नृसिंहोमेशि
रःपातुलोकरक्षार्थसंभवः॥सर्वव्यापीस्तंभवासोभालंमेरक्षतादृढं॥३॥नृसिंहोमेदृशौपा
तुसोमसूर्याग्निलोचनः॥श्रुतीमेपातुनृहरिर्मुनिवर्यस्तुतिप्रियः॥४॥नासांमेसिंहनासोऽ
सुरवंशक्षयंकरः॥मुखंनृसिंहोमेपातुसर्वविद्यादिधःपतिः॥५॥नृसिंहःपातुमेकंठंसदा
प्रह्लादवंदितः॥वक्षःपातुनृसिंहोमेदुर्वदनःरक्तधोमुखोरनाशनः॥६॥दिव्यास्त्रशोभितभुजोनृ
सिंहःपातुमेभुजौ॥करौमेदेववरदोनृसिंहःपातुसर्वदा॥७॥हृदयंयोगिहृत्पद्मनिवा श्रीः
सःपातुनरहरिः॥मध्यंपातुहिरण्याक्षवक्षःकुलविदारकृत्॥८॥नाभिंमेपातुनृहरिःस्व २

नाभिपद्मजस्तुतः॥ब्रह्मांडकोटयःकट्यांयस्यासोपातुमेकटिं॥९॥गुह्यंमेपातुगुह्यानां
मंत्राणांगुह्यरूपधृक्॥ऊरूमनोजवःपातुजानुनीहररूपधृक्॥१०॥जंघेपातुधराभारहार
कोसौनृकेसरी॥सुरराज्यप्रदःपातुपादौमेनरकांतकः॥११॥सकृत्स्मृतोऽघौघहरःपातुमस
र्वतस्तनुं॥अतःपरंमंत्रपरःपातुमांसर्वदिक्ष्वनः॥१२॥मदोग्रःपूर्वतःपातुमहावीरोऽग्नि पृ
भागतः॥१३॥महाविष्णुर्दक्षिणेवमहाज्वालस्तुनैर्ऋते॥१४॥पश्चिमेपातुसर्वेशःसर्वोग्रः
सर्वतोमुखः॥नृसिंहःपातुवायव्योसौम्येभीषणोऽद्भुतः॥१५॥ईशान्येपातुभद्रोमां
सर्वमंगलदायकः॥संसारभयतःपातुमृत्युमृत्युर्नृकेसरी॥१६॥इदंनृसिंहकवचं
प्रह्लादमुखमंडितं॥भक्तिमान्यःपठेन्नित्यंसर्वपापैःप्रमुच्यते॥१७॥पुत्रवान्
धनवान्लोकेदीर्घायुरिहजायते॥यंयंचिंतयतेकामंतंतंप्राप्नोत्यसंशयं॥१८॥

सर्वत्र जयमाप्नोति सर्वत्र विजयी भवेत् ॥ भूम्यंतरिक्षदिव्यानां ग्रहाणां च
निवारणं ॥ २७ ॥ दुष्टश्चिकोरगा सूभूतविषापहरणंशुभं ॥ ब्रह्मराक्षसयक्षाणां
दूराद्दूरावकारकं ॥ २८ ॥ भूर्जे धातोऽपत्रेवाल्लिखितंकंठेशुभं ॥ करमूलेधृतं
येनसिद्ध्यंतिकर्माणि ॥ २९ ॥ नरसिंहकवचेनेक्षितोवज्ररक्षितः ॥ एवंसुरक्षि
तेषुस्वाज्ञयाविजयीभवेत् ॥ ३० ॥ एकसंध्यंद्विसंध्यंवात्रिसंध्यंयः पठेन्नरः ॥ सर्वा
तिपरमारोग्यंविष्णुलोकंसगच्छति ॥ ३१ ॥ इदंरहस्यंकवचंनारसिंहंमयोदितं ॥
गोपनीयंप्रयत्नेनदेवानामपिदुर्लभं ॥ ३२ ॥ यस्यदेयंनदातव्यंनाभक्तायकदाचन ॥
तस्यैवफलसिद्ध्यर्थंनान्यथासिद्धिःप्रजायते ॥ ३३ ॥ तिलकंधारयेद्यस्तुतस्यैवफलसिद्धयेत् ॥
त्रिवारंजपमानस्तुपूर्वंवाथमभिमंत्रितं ॥ ३४ ॥ पाययेद्यंनरंत्रीन्दिवसान्यावन्मात्रंतुतस्यरो
गाःशत्रवस्तथैवस्युःकुक्षिसंभवाः ॥ ३५ ॥ इदंकवचमज्ञात्वायोनरंसेवतेमंद

सर्वचिंतितंयद्यत्तत्प्राप्नोत्यसंशयं ॥ ३६ ॥ इतिपरमरहस्यंसारमंत्रकवचवरंपठतीहय
स्कंधोक्त्या ॥ सभवतिधनधान्यपुत्रयुक्तोजयविजयेसमुपेतिनारसिंहं ३७ भयंनास्ति
भयंनास्तिनृसिंहपदसेविनां ॥ सत्यंसत्यंवचोवक्ष्मिशंकरोहंत्रिलोचनः ३८ कुतोभीतिःकु
तोमृत्युःकुतस्तस्यदरिद्रता ॥ मृत्युमृत्युरमानाथायस्यनाथोनृकेसरी ३९ गर्जनंभ
वबीजानांवर्धनंसर्वसंपदां ॥ तर्जनंयमदूतानांनृहरेर्नामगर्जनं ४० तप्तहाटककेशांतज्व
लत्पावकलोचन ॥ वज्रादपिकठोरस्पर्शदिव्यसिंहनमोस्तुते ४१ ॐ वज्रनखायविद्महेती
क्ष्णदंष्ट्रायधीमहि ॥ तंनोनारसिंहश्चोदयात् ॥ मातानृसिंहश्चपितानृसिंहोभ्रातानृ
सिंहश्चसखानृसिंहः ॥ विद्यानृसिंहोद्रविणंनृसिंहःस्वामीनृसिंहःसकलंनृसिंहः ४२ यतो
नृसिंहःप्रथमोनृसिंहोयतोयतोयामितोनृसिंहः ॥ नृसिंहदेवादपरंनकिंचित्तस्मान्नृसिंहंशर

Digitized with financial assistance from the Government of Maharashtra on 11 June, 2017

समाप्तः